# Munikrita Shri Hari Stuti

# મુનિકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Munikrita Shri Hari Stuti

File name : munikRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# મુનિકૃતા શ્રીહરિસ્તુતિઃ

(પઞ્ચચામરમ્)
સમસ્ત પાપઘાતિનં સમસ્તતાપનાશિનં
સમસ્તદુઃખહારિણં સમસ્તસૌખ્યકારિણમ્ ।
સમસ્તધામધારિણં સમસ્તલોકપાલિનં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૧॥

કુશાસ્ત્રમાર્ગખણ્ડકં સુશાસ્ત્રરાદ્ધમણ્ડકં
કુમાર્ગચિત્તદણ્ડકં હ્યહિંસનાધ્વપોષકમ્ ।
નિજાશ્રિતારિનાશકં સ્વમૂર્તિશર્મદાયકં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૨॥

અધર્મમૂલછેદકં સદુદ્ધવાધ્વચાલકં
સમગ્રધર્મશંસકં વિમોક્ષબોધદાયકમ્ ।
સુનીતિરીતિદર્શકં પ્રપન્નજીવરક્ષકં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૩॥

પ્રકાશદં પ્રભાવદં પ્રતાપદં પ્રતોષદં
સુયુક્તિદં સુતુષ્ટિદં સુપુષ્ટિદં સુબુદ્ધિદમ્ ।
વિબોધદં વિનોદદં વિમોદદં વિમોક્ષદં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૪॥

સુદર્શદં સુભદ્રદં સુશાન્તિદં સુકાન્તિદં
ક્ષમાકરં યશસ્કરં શુભઙ્કરં સુખઙ્કરમ્ ।
યશસ્વિનં તપસ્વિનં તરસ્વિનં ચ વાગ્મિનં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૫॥

નિતાન્તધામરાજિતં સ્વમુક્તવૃન્દસેવિતં
મુનીન્દ્રજાતપૂજિતં સ્વભક્તસઙ્ઘપ્રાર્થિતમ્ ।
સુરાસુરેન્દ્રવન્દિતં ક્ષમાદયાદિમણ્ડિતં

નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૬॥

સમસ્તસિદ્ધિદાયકં તથાપિ સક્તિવર્જિતં
સમસ્ત ભુક્તિદાયકં તથાપિ ભોગવર્જિતમ્ ।
સમસ્તલોકપાલકં તથાપિ ગર્વવર્જિતં
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૭॥

યદીયભાલપટ્ટકે નિભાલ્યતે પરા પ્રભા
યદીયપાદપઙ્કજે સુનૂપુરોત્થસંવિભા ।
યદીયપાણિપલ્લવે વરાભયાત્મિકા કૃપા
નમામિ ધર્મનન્દનં સમસ્તલોકવલ્લભમ્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે ચતુર્થપ્રવાહે
નવ તરઙ્ગે મુનિકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Munikrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*